# মহাষোডশীবর্ণরত্নাবলিস্তোত্রম্

{॥ মহাষোডশীবর্ণরত্নাবলিস্তোত্রম্ ॥}

হ্রীংকারাঙ্কণদীপিকাং শ্রিতজনানন্দপ্রদাং শ্রীমতীং

শ্রীনাথাদ্যমরার্চিতঙ্ঘ্রিকমলাং শ্রীসুন্দরীং ভাবযে ।

শ্রীমন্মঞ্জুলরত্নসানুবিলসন্মধ্যস্থকূটাগ্রগ-

শ্রীমন্নাগরমধ্যলাসিসুমহচ্ছ্রীচক্রবিন্দৌ স্থিতাম্ ॥ ১॥

হ্রীংকারামৃতসিন্ধুকৌস্তুভমণিং হ্রীংকারমধ্যস্থিতাং

হ্রীংকারোন্নতরত্নসৌধবলভীসংলাসিপারাবতীম্ ।

হ্্রীংকারমরপাদপাগ্রবিহরৎসংহৃষ্টকেকীং ভজে

হ্রীংকারাম্বুদচঞ্চলাং হৃদি গতাং হ্রীংকারবর্ণাত্মিকাম্ ॥ ২॥

ক্লীংকারাম্বুজপত্রভাস্করনিভাং ক্লীংকারচন্দ্রপ্রভাং

ক্লীংকারাগ্নিশিখাং ভজামি সততং ক্লীংকারপেটীমণিম্ ।

ক্লীংকারোপবনান্যপুষ্টগৃহিণীং ক্লীংকারবেদ্যাত্মিকাং

ক্লীংকারাব্জহরপ্রিযাং পরতরাং ক্লীংকারবর্ণাত্মিকাম্ ॥ ৩॥

ঐং ঐমিত্যনুচিন্তকাচ্ছহৃদযাম্ভোজাটবীহংসিকাং

ঈশিত্বাদিবিভূতিসংবৃতমহারত্নাসনে সংস্থিতা ।

ঐশ্বর্যায ভবত্বখণ্ডবিভবা যাম্বা সদা মে গৃহে

চেশাদ্যর্চিতপাদপঙ্কজযুগা চৈশাঙ্কমঞ্চস্থিতা ॥ ৪॥

Stotram Digitalized By Sanskritdocuments.org

সৌন্দর্যদ্রুমমঞ্জরী ভগবতী সৌবর্ণবর্ণাবতা-

ন্মাং সংসারমহাভযাদ্ দ্রুততরং সৌবর্নকুম্ভস্তনী ।

সূর্যাব্জারিকৃশানুদৃক্ শশিকলোত্তংসা সদানন্দদা

সৌভাগ্যং দিশতাদথ প্রথিতমপ্যব্যাহতং ভূরি মে ॥ ৫॥

ওঙ্কারার্থনিরূপণৈকমনসা চোংকারনাদাত্মনা

শ্রীদেব্যা মম চিত্তভিত্তিরধুনা চিত্রাযতে চোজ্জ্বলা ।

ওজোভির্জগদেতদদ্য বিপুলং যস্যাস্তযাব্জপ্রভৈ-

রোতপ্রোতমভূত্ কুসুম্ভকুরুবিন্দাব্জপ্রভাযাঃ সদা ॥ ৬॥

হ্রীংকারাগমমস্তকং হৃদি কদা ভাযাদ্ বপুস্তে পরং

হ্রীংকারাব্ধিসুধামযং হৃতজপাশোণং হিতপ্রাপকম্ ।

হ্রীংকারাদ্রিগুহাহরীন্দ্রশিশুকং হ্রীংকারকন্দাঙ্কুরং

হ্রীংকারাম্বুজসৌরভং হৃতজগজ্জালং জগন্নাযিকে ॥ ৭॥

হ্রীংকারাধ্বরদক্ষিণে জননি তে পাদাব্জযুগ্মে সদা

ভক্তিং মে জনযাশু দেবি কৃপযা শ্রীদেবি তারাযিতে ।

শ্রীমন্মঞ্জুলরত্ননির্মিতমহামঞ্জীরভূষোজ্জ্বলে

শ্রীশৃঙ্গাররসালযে শ্রিতজগৎস্বান্তাব্জিনীহংসিকে ॥ ৮॥

কল্যাণ বিতনোতু কামমনিশং কামারিবামাঙ্কগা

কস্তূরীঘনসাররূষিতকুচাগ্রালম্বিমুক্তালতা ।

কামাকর্ষণদিব্যপাশসুভগা কান্ত্যার্ককোটিপ্রভা
কল্যাণী কমলেক্ষণা কলিমলপ্রধ্বংসিনী কামদা ॥ ৯॥

এতাবন্মম দেবি তে পদযুগে ভক্তির্দৃঢা ভূযসী
স্যান্নেত্রে চ জপাপ্রসূনরুচিরাযাস্ত্বত্তনোর্বীক্ষণে ।
আনন্দাশ্রুপরিপ্লুতে বচনমপ্যম্ব স্তবে গদ্গদং
চেতস্ত্বন্ময়মম্ব পশ্যতু জগত্ ত্বন্মূর্তিভাসারুণম্ ॥ ১০॥

ঈশানাদিপদাঞ্চিতে শিবমযে মঞ্চে পরেশাঙ্কগা-
মীশিত্বাদ্যখিলাষ্টভূতিমনিশং দাত্রীং স্বভক্তায মে ।
চাপং চৈক্ষবমাশুগং সুমমযং ক্রোধাত্মকং চাঙ্কুশং
পাশং রাগতনুং প্রণৌমি দধতীং শ্রীমন্মহাসুন্দরীম্ ॥ ১১॥

লক্ষ্মীং চক্রনিবাসিনীং ললিতসংগীতপ্রিযাং লাকিনীং
লব্ধৈশ্বর্যসমুন্নতিং লযকরীং লাস্যপ্রিযামাশ্রযে ।
লঙ্কানাযকবৈরিপূজিতপদাং লাবণ্যবারাংনিধিং
লক্ষ্মীপূজিতপাদপদ্মযুগলাং মোক্ষাখ্যলক্ষ্ম্যৈ সদা ॥ ১২॥

হ্রীংকারার্ণসুধাং চ হৃদ্যমমরৈরীড্যং মহত্ তে বপুঃ
প্রালেযাংশুকলাবিলাসিমকুটং হ্রীংকারনাদাত্মকম্ ।
যে ধ্যাযন্তি হৃদম্বুজে প্রতিদিনং তেষামনঙ্গজ্বর-
ক্লান্তাঃ স্যুর্বশমাগতাস্ত্বনুকলং বধ্বঃ সুরাণাং প্রিযাঃ ॥ ১৩॥

হন্তাস্থাং মিতবৈভবেষু হরিমুখ্যেষ্বেব মূঢা জনা

ভক্তিং পামরদৈবতেষু বিবশাঃ কুর্বন্তি মোহাদিহ ।

ত্যক্ত্বা ত্বাং পরদেবতাং হরিহরব্রহ্মাদিভিঃ সেবিতাং

সর্বৈশ্বর্যমহোদযাং খরমিমে সংত্যজ্য ধেনুং শ্রিতাঃ ॥ ১৪॥

সর্বজ্ঞত্বমবাপ্য সংসদি সতাং শাস্ত্রেষু পাণ্ডিত্যম-

প্যম্বাযাঃ পদপদ্মসংস্মৃতিবশান্মূকোঽপি বাগ্মী ভবেত্ ।

যস্যাস্তচ্চরণাম্বুজং হরিহরব্রহ্মাদিভির্বন্দিতং

মূঢাশ্চিন্তযতাশু বোঽপি তরসা দদ্যাত্ কবিত্বং শ্রিযঃ ॥ ১৫॥

কল্যাণ্যম্ব কদম্বকাননগৃহে কল্পদ্রুমৈঃ কাঙ্ক্ষিতা-

দর্থাদর্থসমর্পণেঽধিকতরে কারুণ্যকল্লোলিভিঃ ।

কর্ণান্তাযতলোচনাঞ্চলগতৈর্বীক্ষ্যাদ্য মামাতুরং

রক্ষাসু ত্রিপুরে পরাৎপরতরে শ্রীকামসংজীবিনি ॥ ১৬॥

হস্ত্যুত্তুঙ্গপৃথূরুকুম্ভকুচযোর্বিন্যস্তহারেণ তা-

মারক্তাংশুকমাল্যভূষণবরৈরুদ্দীপ্যমানামুমাম্ ।

হাহাহূহুমুখস্তুতামনুদিনং হৈযগবীনান্তরা-

মম্বামাদিমবাক্স্তুতামহমলং ধ্যাযাম্যভীষ্টাপ্তযে ॥ ১৭॥

লব্ধজ্ঞানসুধাকরেণ মনসা লক্ষ্যীকৃতং তে বপুঃ

সদ্ভিঃ সংততমম্বুজাক্ষি ললিতে লগ্নং ভবত্বান্তরে ।

লাবণ্যোজ্জ্বলদিব্যগাত্রি বিমলে লাক্ষারসালংকৃতং
শ্রীমৎপাদপযোজযুগ্মমধুনা মন্মূর্ধ্নি নিক্ষিপ্যতাম্ ॥ ১৮॥

হ্রীংকারাব্ধিসুধে হ্রিযা বিরহিতে হ্রীংকারমন্ত্রার্থদে
হ্রীংকারপ্রিযশারিকে মযি কৃপাং হ্রীংকারনাদোদযে ।
হ্রীংকারমলদর্পণপ্রতিকৃতে হ্রীংকারবেদ্যে শিবে
দীনে ময্যধুনা কুরুষ্ব দযযা হ্রীংকারদীপপ্রভে ॥ ১৯॥

সংপৎকর্মণি দীক্ষিতানি সকলাপদ্ভঞ্জনান্যম্ব তে
মামেবাকলযন্তু পঙ্কজদলাক্ষেমংকরাণ্যাদরাত্ ।
ব্রহ্মাদীন্ পদপদ্মলগ্নমকুটান্ হিত্বা কথংচিচ্ছিবে
নেত্রাণ্যদ্য কৃপাসুধারসঝরীসিক্তানি হে সুন্দরি ॥ ২০॥

কল্পান্তে হৃৎসর্বলোকজঠরস্যানন্দনাট্যং মুদা
কর্তুর্যন্মণিকুণ্ডলীযুগলিকা দীপাযতে সংততম্ ।
ব্রহ্মোপেন্দ্রমুখামরে বিরমতি ব্রহ্মাণ্ডভাণ্ডে পরং
সা পাশাঙ্কুশপুষ্পসাযকধনুর্বিদ্যোততাম্নে হৃদি ॥ ২১॥

লক্ষ্যং কিংচ ভবেন্মহাত্রিপুরসুন্দর্যাগমান্তৈর্নুতে
মাং লক্ষ্যীকুরু বীক্ষণাশুগততেস্ত্বামেব সর্বাত্মনা ।
ধ্যাত্বা চেতসি সংস্থিতং জগদিদং ত্বদ্রূপমার্যে সদা
জ্ঞাত্বাননন্যহৃদা বিহায ভজনং নশ্যৎসু দেবেষ্বিহ ॥ ২২॥

হ্রীংকারস্মরণেন দেবি তরসা হ্রীমান্ সুধীমান্ ভবেত্

তে মূকোঽপি জডোঽপি পদ্মজনুষা সাপত্নিকোঽভূদ্ ভৃশম্ ।

আশ্লিষ্যাম্বুধিকন্যকাং বিলসতি শ্রীমন্ত্ররাজাক্ষরং

তন্ময্যাদিশ দেবদেবি কৃপযা ধন্যোঽস্ম্যহং তেন চ ॥ ২৩॥

সৌবর্ণোজ্জ্বলমণ্ডপে মরতকপ্রাকারভিত্তৌ বৃহ-

ন্নানারত্নমযাসনে শিবমযে শ্রীকামরাজাঙ্ককে ।

তিষ্ঠন্তীং কুরুবিন্দবৃন্দরুচিরাং মাণিক্যভূষোজ্জ্বলাং

ধন্যাস্তে ভুবি চিন্তযন্তি মনসা যে শ্রীমহাসুন্দরীম্ ॥ ২৪॥

ঐংকারাম্বুজকর্ণিকোজ্জ্বলমহদ্রত্নাসনে সংস্থিতাং

সিঞ্চন্তীমমৃতদ্রবৈঃ শশিশিলাস্পষ্টাভিরামপ্রভাম্ ।

তেজোভির্জগদম্ব যে ভুবি ভজন্ত্যাপীনতুঙ্গস্তনীং

তেষামাননপঙ্কজে নিবসতে বাণী সুধাস্যন্দিনী ॥ ২৫॥

ক্লীমিত্যক্ষরমেকমেব মনসা ধ্যাযন্তি যে মানবাঃ

কংদর্পাযুততুল্যসুন্দরতরশ্রীমূর্তযঃ শৈথিলম্ ।

কুর্বন্তি স্ম রতেশ্চ নৈজবপুষা তে পাতিব্রত্যং সহ

স্পর্ধন্তে হৃতবাগ্রমাঃ কমলনাভাব্জাসনাভ্যাং সদা ॥ ২৬॥

হ্রীংকারীং হৃদযাম্বুজেঽহমধুনা হ্রীংকারসৌধে শুভে

হ্রীংকারোন্নতরত্নমঞ্চফলকে হ্রীংকারশোণাম্বুজে ।

হ্রীংকারাক্ষরমুচ্চরদ্ভগবতীমারোপ্য শোণপ্রভাং

হ্রীংকারাম্বুজবারিগন্ধফলতাম্বূলাদিভিস্তোষযে ॥ ২৭॥

হ্রীংকারামৃতপাদমঞ্জুলমণীবেদ্যন্তরে ভাসুরাং

শ্রীদেবীং শ্রিতসর্বলোকসকলাভীষ্টপ্রদানোৎসুকাম্ ।

শ্রীশ্রীমত্তনুমুদ্যদর্ককিরণাং শ্রীশাংভবীং শ্রীকরী-

মাত্মৈক্যমুপাস্মহে পরতরাং নির্বাণসংসিদ্ধযে ॥ ২৮॥

ইতি শ্রীমহাষোডশীবর্ণরত্নাবলিস্তোত্রং সংপূর্ণম্

This is a hymn to devi, with the syllables of the sacred

Shrividya mantra mahAShoDashI encoded into the verses.

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Maha Shodashi Varna Ratnavali Stotram Lyrics in Bengali PDF
% File name : mahA16ratna.itx
% Location : doc_devii
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com
% Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com
% Description-comments : This is a hymn to devi, with the syllables of

% Latest update : January 27, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 14, 2015 ] at Stotram Website